ज्योतिष्मती मालकङ्गुनी इति लोके ।
इति महामरिचादितैलम् ॥ * ॥
"तालकस्य तु पत्राणि यस्य सन्ति पृथक् पृथक् ।
अभ्रकस्यैव तद्ग्राह्यं हरितालं चिकित्सकैः ॥
पुनर्नवायाः सरसे तालकं तद्विमर्द्दयेत् ।
दिनमेकं ततस्तस्मिन् घनत्वं गमिते सति ॥
कुर्व्वीत चक्रिकां तां तु शोषयेत् सम्यगातपे ।
पुनर्नवासमस्ताङ्गक्षारे स्थाल्यां गलावधि ॥
पूरयेच्च ततः क्षारं दृढयेत् पीड़नेन हि ।
क्षारस्योपरि तां दद्यात् तालकस्य तु चक्रिकाम् ॥
तत आच्छादनं दत्त्वा मुद्रां कृत्वा विशोषयेत् ।
स्थालीं चुल्ल्यां निधायाग्निममन्दं ज्वालयेत् भिषक् ॥
निरन्तरमहोरात्रपञ्चकं तेन सिध्यति ।
स्वाङ्गशीतं समुत्तार्य्य गृह्णीयाद्रसमुत्तमम् ॥
तालकेश्वरनामायं मुक्तो गुञ्जामितो रसः ।
गुडूच्यादिकषायेण गदानेतान् विनाशयेत् ॥
अष्टादशापि कुष्ठानि वातरक्तं तथोद्धतम् ।
फिरङ्गदेशजं रोगं दुस्तरञ्च व्यपोहति ॥
एतद्भेषजसेवी तु लवणाम्लौ विवर्जयेत् ।
तथा कटुरसं वह्निमातपं दूरतस्त्यजेत् ॥
लवणं यः परित्यक्तुं न शक्नोति कथञ्चन ।
स तु सैन्धवमश्नीयात् मधुरोपरसो हि सः" ॥
इति तालकेश्वरो रसः ॥ * ॥
"तालताप्यशिलासूतटङ्कणं सिन्धुसंयुतम् ।
गन्धार्कौ द्विगुणौ सूताज्जम्बीराद्भिः प्रमर्द्दयेत् ॥
षड्दं पुटितं शोढ़ा भूधरे सकलं त्विदम् ।
षट्पलं द्विपलं ताम्रं लोहभस्म चतुष्पलम् ।
जम्बीराद्भिर्दिनं घृष्टं त्रिंशदंशं विषं क्षिपेत् ।
अस्य माषद्वयं खादेन्मधिर्बीघृतसंयुतम् ॥
मध्वाज्यैर्व्वाकुचीबीजैः कर्षं लिह्यात्ततः परम् ।
तालकेश्वरनामायं सर्व्वकुष्ठहरो रसः" ।
अर्कौ मारितं ताम्रम् । द्वितीयतालकेश्वरो रसः ॥ * ॥
"रसो बलिस्ताभ्रमयः पुरोऽग्निः
शिलाजतु स्याद्विषतिन्दुकञ्च ।
वरा च तुल्यं गगनं करञ्ज-
बीजं पृथग्भागचतुष्टयञ्च ॥
संमर्द्य सर्व्वं मधुना घृतेन
घृतस्य पात्रे निहितं प्रयत्नात् ।
कर्षं भजेत् प्रत्यहमस्य पथ्यं
शाल्योदनं दुग्धमधुत्रयञ्च ॥
विशीर्णकर्णाङ्गुलिनासिकोऽपि
भवेदनेन स्मरतुल्यमूर्त्तिः ।
दारापरित्याग इह प्रदिष्टो
जलौदनं तत्र निबद्धमूले" ॥
ताम्रमयञ्च मारितम् । पुरो गुग्गुलुः । अग्नि-
श्चित्रकम् । विषतिन्दुकः कुचिला । वरा त्रिफला ।
रसादि त्रिफलान्तं सर्व्वं तुल्यम् । गगनमभ्रकम् ।
करञ्जबीजञ्च पृथक् चतुर्गुणं रसात् । तत्र कुष्ठे
बद्धमूले सति जलौदननेव पथ्यम् ।
इति गलत्कुष्ठारिरसः ॥ * ॥
"अथ नागवधाख्यस्य रसस्य विधिरुच्यते ॥
यः पुरा मुनिवरैरुदाहृतो
यश्चिकित्सकजनैः समाहृतः ।
यस्तु कुष्ठपरमोपकारको
नागमारणविधिः स लिख्यते ॥
सुपक्वां स्थालिकामेकामाढ़काम्बुधृतिक्षमाम् ।
गुड़चूर्णकृतैः पङ्कैरागलं लेपयेद्बहिः ॥
गन्धकं भिषगानीय शरावमितमुत्तमम् ।
चूर्णयित्वा तदर्द्धन्तु तस्यां स्थाल्यां प्रसारयेत् ॥
शरावार्द्धस्य ताम्रस्य पत्राण्यतितनूनि च ।
स्थाल्यां यद्गन्धकं तस्मिन्नुपर्य्युपरि धारयेत् ॥
शरावार्द्धस्य सीसस्य पत्राणि च तनूनि च ।
धारयेत्ताम्रपत्राणामुपर्य्येव तथैव च ॥
गन्धकस्य शरावार्द्धं पत्राणामन्तरान्तरा ।
दत्त्वा तस्यावशेषन्तु सर्व्वेषामुपरि क्षिपेत् ॥
ततः पिधानं दत्त्वा तु विदध्यात् सन्धिमुद्रणम् ।
गुड़ं चूर्णञ्च खदिरं मिश्रयेत्तेन मुद्रयेत् ॥
मुद्रां संशोष्य तां स्थालीं चुल्ल्यामुपरि धारयेत् ।
तदधो ज्वालयेदग्निं द्वादशप्रहरावधि ॥
स्वाङ्गशीतं समुत्तार्य्य ततो निष्काश्य चौषधम् ।
शिलायां चूर्णयित्वा तु वस्त्रपूतञ्च कारयेत् ॥
त्रिद्रोणजलयोग्यन्तु विशालास्यं महाघटम् ।
गुड़चूर्णकृतैः पङ्कैरागलं लेपयेद्बहिः ॥
सर्पः षष्ट्यङ्गुलायामः सार्द्धषष्ट्यङ्गुलोऽथवा ।
फणिकः कृष्णवर्णः स्यात् किं वा गोधूमवर्णवान् ॥
वधस्तस्य विधातव्यो यथा देहो न भिद्यते ।
तालकं सदलं यत्तच्चूर्णयेत् कुड़वद्वयम् ॥
विषं पलमितं क्षुण्णं दत्त्वा दत्त्वान्तरान्तरम् ।
हरितालस्य चूर्णेन पूरयेद्भुजगोदरम् ॥
विषं पलमितं क्षुण्णं वाकुचीं पलसंमिताम् ।
भल्लातकं सुपक्वं यत् प्रस्थमैन्द्रयवं तथा ॥
सर्व्वाणि सम्यगास्तीर्य्य धारयेत महाघटे ।
तेषामुपरि सर्पञ्च धारयेत् कुण्डलीकृतम् ॥
सर्पस्योपरि संक्षिप्य धार्य्याण्येतानि पीड़नैः ।
सनालमर्कपत्रं तु शरावयुगलं क्षिपेत् ॥
स्नुहीदलं सनालञ्च क्षिपेत् प्रस्थमितं तथा ।
वटप्ररोहं प्रस्थं च कुमारीं प्रस्थसंमिताम् ॥
दत्त्वा पिधानं चूर्णेन गुड़ेन खदिरेण च ।
मुद्रयेत् सह वस्त्रेण मृदा कुटितयापि च ॥
मुद्रां संशोष्य चुल्ल्यान्तु धारयेत्तं महाघटे ।
तदधो ज्वालयेदग्निं याममेकं यथौदने ॥
ततो हठाग्निर्दातव्यो यावत् स्युः प्रहरा दश ।
पुनः प्रहरमेकञ्च वह्निं दद्याद्यथौदने ॥
ततो लौहे कटाहे तु शरावत्रितयोन्मिते ।
गोघृतं प्रक्षिपेत् सर्व्वमौषधं यद्घटे स्थितम् ॥
दत्त्वाग्निं चालयेत्तावद्यावदुत्तिष्ठतेऽनलः ।
भेषजं च भवेच्छ्वेतं ततस्तस्मिन् परिक्षिपेत् ॥
भृष्टायाः स्फटिकाख्याया द्वे पले तत्र निःक्षिपेत् ।
भृष्टस्य टङ्कणस्यापि पलयुग्मञ्च निःक्षिपेत् ॥
ततः प्रहरमेकं तच्चालयेच्चुल्लिकोपरि ।
ततस्ताम्रञ्च सीसञ्च मिश्रयित्वावतारयेत् ॥
रसो नागवधाख्योऽयं विधिनानेन सिध्यति ।
आदौ गुञ्जामितं खादेत्तावन्मरिचसंयुतम् ॥
क्रमेण वर्द्धयेत्तावद्यावद्गुञ्जाचतुष्टयम् ।
वर्द्धयेन्मरिचञ्चापि तथैव हि यथारसम् ॥
यवस्य पर्पटीं भोक्तुं दद्याद्वा षष्टिकौदनम् ।
लवणं वर्जयेत् सप्त दिनानि गुणलोलुपः ॥
लवणं यः परित्यक्तुं न शक्नोति कथञ्चन ।
सैन्धवं खादयेत्तेन तच्च सप्तदिनोपरि ॥
रसेनानेन नश्यन्ति कुष्ठानि सकलान्यपि ।
सन्निपाताश्च नश्यन्ति राजयक्ष्मादयस्तथा ॥
इति नागवधाख्यो रसः ॥ * ॥ अथ विशिष्टानां
कुष्ठानां चिकित्सा । तत्र सिध्मस्य चिकित्सा ।
"कुष्ठं मूलकबीजं प्रियङ्गवः सर्षपा रजनी ।
एतत् केशरषष्ठं निहन्ति च बहुवार्षिकं सिध्मम् ॥
शिरीषरसेन पिष्टं मूलकबीजं प्रलेपतः सिध्मम् ।
क्षारेण वा कदल्या रजनीमिश्रेण नाशयति ॥
दार्व्वी मूलकबीजानि तालकः सुरदारु च ।
ताम्बूलपत्रं सर्व्वाणि कार्षिकाणि पृथक् पृथक् ॥
शङ्खचूर्णन्तु शाणः स्यात् सर्व्वाण्येकत्र वारिणा ।
पेषयेत प्रलेपोऽयं सिध्मानां नाशनः परः" ॥ * ॥
अथ चर्म्मदलस्य चिकित्सा ।
"सलिले चाम्रपेशी तु किञ्चित्सैन्धवसंयुता ।
ताम्रपात्रे विनिर्घृष्टा लेपाच्चर्म्मदलापहा" ॥
चाम्रपेशी आमचूर ।
"सलिलेन तु शुष्काणि घृष्ट्वा धात्रीफलानि च ।
कराभ्यां सुखमाप्नोति नरश्चर्म्मदलान्वितः" ॥ * ॥
अथ पामाचिकित्सा ।
"जीरकस्य पलं पिष्टं सिन्दूरार्द्धपलं तथा ।
कटुतैलं पचेदाभ्यां सद्यः पामाहरं परम्" ॥
कटुतैलं षट्पलमितम् । जीरकादितैलम् ॥ * ॥
"मञ्जिष्ठात्रिफलालाक्षालाङ्गलीरात्रिगन्धकैः ।
चूर्णितैस्तैलमादित्यपाकं पामाहरं परम्" ॥
इति आदित्यपाकतैलम् ॥
"सैन्धवं चक्रमर्द्दश्च सर्षपाः पिप्पली तथा ।
आरनालेन संपिष्टाः पामकण्डूहराः स्मृताः" ॥ * ॥
अथ कच्छूचिकित्सा ।
"अर्कपत्ररसे पक्वं हरिद्राकल्कसंयुतम् ।
नाशयेत् सार्षपं तैलं पामां कच्छूं विचर्च्चिकाम्" ॥
अर्कतैलम् ।
"मनःशिलालं कासीसं गन्धाश्मा सिन्धुजन्म च ।
स्वर्णक्षीरी शिलाभेदी शुण्ठी कुष्ठञ्च मागधी ॥
लाङ्गलीकरवीरश्च स्नुग्भः कृमिहानलः ।
दन्तीनिम्बदलश्चैभिः पृथक्कर्षमितैर्भिषक् ॥
कल्कीकृतैः पचेत्तैलं कटुप्रस्थद्वयोन्मितम् ।
अर्कसीहुण्डदुग्धेन पृथक्पलमितेन च ॥
गोमूत्रस्याढ़केनापि शनैर्मृदग्निना पचेत् ।
अभ्यङ्गेन हरेदेतत् कच्छूदुःसाध्यतामपि ॥
पामानञ्च तथा कण्डू त्वग्व्याधिबधिरामयान् ।
कच्छूराक्षसनामेदं तैलं हारीतभाषितम् ॥
इति कच्छूराक्षसनामतैलम् ॥ * ॥
अथ दद्रुचिकित्सा ।
"कुष्ठं कृमिघ्नो दद्रुघ्नो निशासैन्धवसर्षपाः ।
कञ्जिपिष्टाः प्रलेपोऽयं दद्रुकुष्ठनिसूदनः ॥
दूर्व्वाऽभयासैन्धवचक्रमर्द-
कुठेरकाः काञ्जिकतक्रपिष्टाः ।